CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

[illegible]

# जगद्गुरु श्री रामानन्दाचार्य-राम प्रपत्त्याश्रम

[illegible]

# ज.गु.श्री रामानन्दाचार्य-पीठ

## सचित्र धार्मिक मासिक

कार्यालय ❀ आचार्यपीठ श्री कोशलेन्द्रमठ सरखेजरोड
पो० पालडी अहमदाबाद ३८०००७
दूरभाष- ४११००१

संरक्षक 卐 शेठ श्री अमरशी कुरजी मजिठिया
सम्पादक -卐 जगद्गुरु श्रीरामानन्दाचार्यजी
सहसम्पादक 卐 पं. श्री शरच्चन्द्र शास्त्री
व्यवस्थापक 卐 मं. म. स्वामी रामावतारदासजी (रत्न)

---

# जगद्गुरु श्रीरामानन्दाचार्याः

एवं

# सद्गुरु का कोई विकल्प नहीं

---

वर्ष १६ विक्रमाब्द २०५१ अङ्क ७
श्रीरामानन्दाब्द ६९४ सितम्बर १९९४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आनन्दभाष्यसिंहासनासन जगदाचार्य जी की

## ॥ मङ्गलकामना ॥

योगनिष्ठो महायोग सत्सेवितपदाम्बुजः ।
सदा वैष्णवधर्माणामुपदेशपरायणः ॥१॥
मनुः पीपाभिदोजात उत्तराफाल्गुनीयुजि ।
पूर्णिमायां ध्रुवे चैत्र्यां धनवारे बुधस्य च ॥२॥
इत्यगस्त्यसंहितायां संस्तुतायाथधीमते ।
श्रीपीपाचार्यवर्याय प्रभूयान्मङ्गलं सदा ३॥
श्रीरामानन्दशिष्याय वेदतत्त्वावबोधिने ।
वैष्णवधर्मरक्षित्रे संभूयान्मङ्गलं भुवि ॥४॥
प्रस्थ य ष्याणामानन्दानाञ्चसर्वतः ।
प्रचारकाय संभूयान्मङ्गलं सर्वदा भुवि ॥५॥
श्रीवैष्णवस्यधर्माणां मङ्गलंयस्य राजते ।
प्रबोधपचीसीत्यादि तस्य भवतु मङ्गलम् ॥६॥
रामानन्दाश्रमो यत्र पीपाचार्यस्य शोभते ।
धनुर्धारीति विख्याते नगरे मनमोहकः ॥७॥
यस्य संस्थापक आसीद् गोकुलदासविश्रुतः ।
महान्तश्चाधुनादीप्तो दयारामोऽस्ति कीर्तिमान् ॥८॥
व्यवहारपटुर्यश्च देवाराधन तत्परः ।
वैष्णवसेवानिरत स्तस्य भूयात्सुमङ्गलम् ॥९॥
पीपाचार्यादि सर्वेष माचार्याणाञ्च यः खलु ।
आदर्शस्थापको भूयाद्रामानन्दाश्रमः सदा ॥१०॥
अश्वाननाब्धिब्रह्माब्दे चैत्रे श्रीपूर्णिमातिथौ ।
अवातरच्छ्रीपीपार्यो वैष्णवधर्मरक्षकः ॥११॥
संस्थाप्य भूमौ सर्वत्र रामानन्दार्य सन्मतम् ।
विक्रमे चागमत्प्राज्ञः स्वजनितिथिभूषिते ॥१२॥
इति संबोधितं यस्य सारचरितमुत्तमम् ।
तस्याचार्यवरिष्टस्य संभूयान्मङ्गलं भुवि ॥१३॥
आनन्दभाष्यकाराणां सिंहासने स्थितेन हि ।
मंगलकामनाव्यक्ता सुयोजिते महोत्सवे ।१४।
श्रीवैष्णवानां भव्यानां समाराधन संज्ञके ।
भाद्रकृष्णे त्रयोदश्यां शनिवासरसंयुते ।१५।
ब्रह्मबाणखनेत्राब्दे विक्रमे शन्तनोतु वः ।
शिवब्रह्मादिसंसेव्यः श्रीरामः परमेश्वरः ॥१६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

# जगद्गुरु श्रीरामानन्दाचार्याः

आनन्दभाष्यसिंहासनासीन

जगद्गुरु श्रीरामानन्दाचार्य श्रीरामेश्वरानन्दाचार्यः

(पूर्वपीठिका)

एकं पत्रं जगद्गुरु रामानन्दाचार्य–श्रीरामेश्वरानन्दाचार्यात् गाण्डीवे समागतं यद्भवन्तः स्वकीये २२ टंकारस्य ३३ शरे सम्पादकीये लिखितवन्तः यद्भगवन्तो जगद्गुरु रामानन्दाचार्याः श्रीरामानुजाचार्य शिष्य परम्परायामासन् । तद्यथा–"रामानुज शिष्याणां द्विधा विभक्ता परम्परा प्राप्यते । वेदान्तदेशिकः प्रथमायाः, लोकाचार्यश्च अपरस्याः परम्परायाः प्रातिनिध्यं बिभ्रतः । लोकाचार्य परम्परायामेव आविर्बभूव काशिकेयः श्रीरामानन्दाचार्यः, योहि कबीरमपि स्वसम्प्रदायेऽदीक्षयत् ।' अत्र यद्यपि वैष्णवमताब्ज भास्कर ☬ ग्रन्थात् प्रमाणरूपेण किञ्चित् सम्पादकीये दत्तमस्ति । तथापि तद् जगद्गुरवः रामेश्वरानन्दाचार्याः नैव मन्यन्ते ।

एते तु शारीरकमीमांसाया श्रीमदानन्दभाष्यस्य भूमिकायां लिखितं स्वरूपं तदेव मन्यन्ते तद् यथा–'अखिल योगिजनजेगीयमानयशोनिकरकरुणाकमनीय कान्ति कलितकलेवरप्रतिवादिमतमातङ्ग–घटा विघटनकेसरिणः श्रीमज्जानकीजानिप्रसादमुल्लासित श्रीराममन्त्रादिरहस्यत्रयप्रवर्तकाचार्यश्रुतिशिरः समुद्भासितविशिष्टाद्वैतमतप्रतिपन्थिपयोधरोत्सारणप्रबलप्रभञ्जना सुरमुनिमनुजमनोमोदमादधानाः सकल संयमिहृदयमानसविकसितारविन्दवृन्दारकवृन्दवन्दनीयपादारविंद श्रीरामानन्दमुनीन्द्राः भारतीयावनितलमलञ्चक्रुः ।

अत्रेदमवधेयं लोकानां हितकाम्यया पूर्वं साकेतलोक एव प्रथितं निरतिशयप्रियं श्रीराममहामनुं कलावपि सर्वेषु लोकेषु विशेषेण प्रवर्तयिष्यन् साकेतपतिर्भगवान् श्रीरामचन्द्रः–

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥

इति स्वकीयोदितं चरितार्थयन् स्वयमेव भगवद्रामानन्दाचार्य स्वरूपेणावततार ...।

---

☬ अवधेयम्–आनन्दभाष्यकारजी श्रीवैष्णवमताब्जभास्कर में स्वपरंपरा काउल्लेख नहीं किये हैं मात्र उपनिषद् तथा गीतानन्दभाष्य में ही किये हैं ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



इसकी प्रतिक्रिया गाण्डीव १६।११ में प्रकाशित हुई जो हमें गाण्डीव के 'मासस्य द्विरधीते' नियमानुसार विलम्ब से प्राप्त हुआ परिहार रजि.सं. ३५९३ दि०२३।२।९४ को भेजा स्मारक दि० २३।४।९४ सं० २९५।९४ पुनः रजि. पत्र सं. २९७।९४ दि० ५।५।९४ एवं रजि. पत्र सं०३१०।९४ दि० ५।७।९४ से स्मरण दिलाने पर भी अबतक प्रकाशित न होने एवं कोई स्पष्टीकरण भी प्राप्त न होने से आचार्य पीठ पत्रिका में ही सखेद प्रकाशित किया जा रहा है—

प्रकृतप्रस्तावे 'गाण्डीवे' टंकारः १७ सरः १ द्वितीय पृष्ठे श्रीरूपनारायण पाण्डेयस्य रामनगरस्थस्य वैमत्यं प्रकाशितमस्ति। तत्र 'जगद्गुरु श्रीरामानन्दाचार्य रामेश्वरानन्दाचार्यस्य मतं पठितम् किन्तु तत् समीचीनं न प्रतीयते' इति प्रकरणसमप्रायकमिदमिति 'तत् समीचीनं प्रतीयते' इत्येवोत्तरमस्य स्यात् तथापि अनेकच्छात्रैः विद्वद्भिश्च प्रेरित सन् किञ्चित् विचार्यते। तदत्र (१) डा० हजारीप्रसाद द्विवेदी मतम् (२) उद्धृतानन्दभाष्यस्य भूमिकायाः असंगतिः (३) आचार्यचरणानां गुरवः के आसनिति पक्षत्रयं समुद्भावितम्।

तदत्र प्रथमपक्षे भारतराष्ट्रस्य भूतपूर्वराष्ट्रपति डा. सर्वपल्ली राधाकृष्णन् महाभागाः 'भारतीयदर्शन' ग्रन्थे '......पूर्व चिन्तन व लेखन ही जिनकी लेखनी का अथवा विचाराभिव्यक्ति का एकमात्र सम्बल है ऐसे स्वतन्त्र चेताशून्य सैद्धान्तिक मान्यताओं से अनभिज्ञ कुछ विद्वान् स्वामी रामानन्दजी को तथा उनके गुरुदेव स्वामी राघवानन्दजी को रामानुज परम्परा का अनुयायि कहते हैं, जो सर्वथा भ्रान्ती मूलक है। सैद्धान्तिक एवं व्यवहारिक कुछ समानताओं के

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



आधार पर ही यदि एकता की स्थापना होने लगे तो किसी भी सम्प्रदाय का स्वतन्त्र अस्तित्व नहीं सिद्ध हो पायेगा। जो आरोप रामानन्दाचार्य पर लगाया जाता है वह रामानुजाचार्य पर भी लगाया जा सकता है। ऐसी ही मूढ दृष्टि वालों ने श्रीशङ्कराचार्य को प्रच्छन्न बौद्ध कहा था। अत एव स्वामी रामानन्दाचार्यजी की परम्परा सर्वथा स्वतन्त्र है जिसकी शुरुआत श्रीरामजी से हुई है—'लिखन्ति। एवं 'रामभक्ति साहित्य में मधुर उपासना' इति प्रबन्धे डा. भुवनेश्वरनाथ मिश्राः सप्ताधिकपरम्परायाः समुल्लेखं विधाय विविच्य निर्णयरूपेण लिखन्ति—'इस परम्परा से यह बात मालूम होती है कि श्रीरामानन्द स्वामीजी महाराज श्रीरामानुज स्वामी के परम्परा में से नहीं हैं।' तथा डा० किशोरीदास स्वामिनः 'भारतीय दर्शन और मुक्ति मीमांसा' इति प्रबन्धे सुस्पष्टतया जगद्गुरोः श्रीरामानन्दाचार्यस्य विचाराभिव्यक्ति परम्पराञ्च पृथग्रूपेण प्रदर्शयन्ति तथैव डा० आर. एस. प्रजापति महाभागाः 'रामानन्द सम्प्रदाय और साहित्य' इति प्रबन्धे जगद्गुरोः परम्परायाः दर्शन साहित्य क्षेत्रे चिन्तनं च श्रीरामानुजीय परम्परायाः गन्धाभावं सूचयन्ति। एवं डा० रामतवक्या शर्मणोऽपि श्रीरामानन्द रामानुज परम्पराया एकत्वप्रतिपादनविषये असामञ्जस्यं सूचयन्ति। डा. योगीराज गोवत्स महानुभावाः 'वैष्णव कबीर' इत्याख्ये स्व ऐतिहासिक प्रबन्धे श्रीरामानन्दसम्प्रदायस्य श्रीरामानुजसम्प्रदायेन सह स्नानसूतकाभावं स सौगन्धं निरूपयन्ति परम्परादि विषये ऋते 'विशि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



ष्टाद्वैत' इति दार्शनिक सिद्धान्तम् । डी· लिट् श्रीरामकुमार दास महानुभावाः स्वकीयेषु अनेकेषु प्रबन्धेषु उभयोः सम्प्रदाययोः परम्पराचारव्यवहारादिविषये छायायाः अप्यत्यन्ताभावं व्यवस्थापयन्ति । किञ्च साहित्य धुरिणाः श्रीअवधकिशोरदास महानुभावाः 'धर्मलोक के तारे' 'आचार्य लीलामृत' प्रभृतिषु अनेकेषु प्रबन्धेषु द्वयोः सम्प्रदाय व्यवहारयोः परम्परायाश्चात्यन्तं पृथक्त्वं निरूपयन्ति । जगद्विजयी महामहोपाध्याय जगद्गुरु श्रीरामानन्दाचार्य श्री रघुवराचार्य वेदान्तकेशरिणाम् 'आचार्यस्मृति' अभिनव वाचस्पति पंडितसमाट् श्रीवैष्णवाचार्याणाम् 'प्राचार्यविजय ध्वजः' सावकाश प्राचार्य हरिकृष्ण शास्त्रिणाम् 'आचार्य विजयः' स्वामी बलरामाचार्याणां 'आचार्यपरिचर्या' विद्यारत्न स्वामी श्रीदेवेन्द्राचार्याणां 'श्रीसम्प्रदाय' जगद्गुरु श्री रामानन्दाचार्य श्रीरामप्रपन्नाचार्ययोगीन्द्रवर्याणां 'आचार्य स्तुति चन्द्रिका' महाकवि जयरामदेव महाभागानां 'श्रीरामानन्दायन' सावकाश प्रधानाचार्य पंडित वैद्यनाथ मिश्र विद्यावाचस्पति महाभागानां 'श्रीआचार्य कीर्तिलता' मदीया 'श्रीसम्प्रदाय कल्पलता' 'देशिक परिचर्या' 'आचार्य मङ्गल ध्वजः' 'जगद्गुरु श्रीरामानन्दाचार्यः' प्रभृतिनामनेकेषां प्रबन्धानान्तु गणनैव का कर्तव्या । यत्र साटोपम् पृथक्त्वम् निरूपितमस्ति । पक्षपातरहितैः विवेकचक्षुभिः सानन्दं स्वाध्यायं कर्तुं शक्यते ।

द्वितीयपक्षे गाण्डीवे (१६–१।४१) समुद्धृता भूमिका अपूर्णा विद्यते स्थानाभावेन कार्यशैघ्याद्वा सम्पादकेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF


तस्या मध्यमांशः समुद्धृतो नतु साकल्येन पूर्वोत्तरभागः। यत्र अविकलं पृथक्त्व स्वरूपम् समनुभवितुं शक्यते पाठकैः। विविधागमादिप्रामाणिकशास्त्रै निरूपितत्वात्। समुद्धृतांशतोऽपि वेदान्तशास्त्रकाननेऽवगाहनशीलैः समनुभवितुं शक्यते पृथक्त्वम् नतु पक्षपातैकशीलैः। यतो हि "--श्रीमज्जानकीजानिप्रसादमुल्लसितश्रीराममन्त्रादिरहस्यत्रय प्रवर्तकाचार्य---।' इत्यंशेनैवावगन्तुं शक्यते यत् 'रामानुज मताद्भिन्नं श्रीरामानन्द सम्मतम्। मन्त्रोपास्येष्टदेवस्य भेदादेवेति निश्चितम्।' इति शास्त्रोक्तदिशा मन्त्रोपास्येष्ट देवस्य भेदात् सम्प्रदायोभिद्यत इति सार्वभौमिकसिद्धान्तः। ततश्च समुद्धृत भूमिकाखण्डे मन्त्रस्योपास्यदेवस्य च समुल्लेखात् तयोः प्रचारकाः प्रसारकाः प्रवर्धकाश्च श्रीआनन्दभाष्यकारा एवासन्। नतु श्रीरामानुजाचार्याः। तेषां मन्त्रः श्रीनारायणमन्त्रः। इष्टश्च श्रीनारायण इति प्रथितमेवातो दर्शनसाहित्यावगाहनशीलवद्भिः साम्प्रदायिकरहस्य विद्भिरतिरोहितम्। किञ्च आनन्दभाष्यसिंहासनासीन जगद्गुरु श्रीरामानन्दाचार्यपर्यवेक्षितः समीक्षासम्राट् श्रीवैदेहीकान्तशरण दर्शनकेशरिभिः लिखित सपरिशिष्ट श्रीमठ स्मारिका समीक्षायाः विद्यारत्न स्वामी श्रीदेवेन्द्राचार्याणां श्रीसम्प्रदायस्य चाचूडं दत्तावधानेन सूक्ष्मेक्षिकया पर्यालोच्यैव उभयोः सम्प्रदाययो रैक्यानैक्यविषये कठिनीव्यापारयितव्या नतु पल्लवग्राहितया।

अन्तिमे पक्षे 'अथाम्नायः सम्प्रदायः' इति शब्दव्याख्यानप्रसंगे 'गुरुपरम्परागतसदुपदेशस्य' इति रामाश्रमी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



काराः। न्यायदर्शनभाष्ये 'शिष्याचार्यसम्बन्धस्याविच्छेदेन शास्त्रप्राप्तिः सम्प्रदायः' इति उद्योतकाराः। इतिशास्त्रप्रामाण्यादविच्छिन्नपरम्परास्वरूपः सम्प्रदायपदवाच्यः, इत्यवशीयते। ततश्च प्रथितमेव यद् जगद्गुरवः श्रीरामानन्दाचार्याः श्रीसम्प्रदायस्य (श्रीरामानन्दसम्प्रदायस्य) द्वाविंशतितमा आचार्याः आसन्निति विश्वविश्रुतमेव के नाम न जानन्ति अतः तेषां गुरुचरणानां विषये का विप्रतिपत्तिः ? भारतीयशास्त्रमर्यादाविरुद्धनिर्गुरुका आसन् ! 'रामानन्दः स्वयं रामः प्रादुर्भूतो महीतले' इत्यागमप्रामाण्यात् मर्यादा पुरुषोत्तमश्रीरामस्यावताराः इति प्रथितमेव सर्वत्र ततश्च किं शास्त्रमर्यादा भञ्जिता तैः ?। परमप्रमाणभूते श्रीअगस्त्य संहितायाः 'आचार्यलक्षणैर्युक्तं वेदवेदान्तपारगम्। श्रीसम्प्रदायश्रेष्ठं च जनोद्धारपरं सदा ॥ विज्ञायराघवानन्दं लब्ध्वा तस्मात् षडक्षरम्। रहस्यत्रयवाक्यार्थं तात्पर्यार्थञ्च सन्मतम् ॥' (१३२–१६–१७) इत्युद्धरणतोवगम्यते यत् श्री आचार्यचरणाः जगद्गुरु श्रीराघवानन्दाचार्यचरणानां शिष्या आसन्। ततः एव च 'इममेवमनुं पूर्वं साकेतपतिर्मामवोचत्। अहं हनुमते मम प्रियाय प्रियतराय। स वेदवेदिने ब्रह्मणे। स वशिष्ठाय। स पराशराय। स व्यासाय। स शुकाय। इत्येषोपनिषत्। इत्येषा ब्रह्म विद्या।' इत्यादिरूपेण अथर्ववेदीयोपनिषत् प्रतिपादितदिशा श्रीसम्प्रदायीय विधानानुसारेण स रहस्यं ब्रह्मतारकषडक्षरश्रीराम महामन्त्रादिकं समुपलब्धम्। परम्पराक्रमश्च तैः 'श्रीरामं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF


जनकात्मजामनिलजं वेधोवशिष्ठावृषी, योगीशञ्च पराशरं श्रुतिविदं व्यासं जिताक्षं शुकम् । श्रीमन्तं पुरुषोत्तमं गुणनिधिं गङ्गाधराद्यान् यतिन् श्रीमद्राघवदेशिकञ्च वरदं स्वाचार्यवर्यं श्रये ॥' इति स्वयमेव प्रदर्शितः श्रीगीतानन्दभाष्ये । प्रकृतश्लोकस्थादिशब्दग्राह्याः 'श्रीसदानन्दाचार्याः, श्रीरामेश्वरानन्दाचार्याःश्रीद्वारानन्दाचार्याः, श्रीदेवानन्दाचार्याः श्रीश्यामानन्दाचार्याः श्रीश्रुतानन्दाचार्याः, श्रीचिदानन्दाचार्याः, श्रीपूर्णानन्दाचार्याः श्री श्रियानन्दाचार्याः, श्रीहर्यानन्दाचार्याः' इति ज्ञेयाः । श्रीआनन्दभाष्यकाराः जगद्गुरु श्रीराघवानन्दाचार्याणां शिष्याः आसन् इति 'नमो भगवते श्रीमत् सुशीलानन्ददायिने । राघवानन्दशिष्याय यतीन्द्राय नमोनमः ।' इत्यादिरूपेण जगद्गुरु श्रीअनन्तानन्दाचार्याः लिखन्ति । अन्येऽपि 'दुर्वादध्वान्तमार्तण्ड राघवानन्द सन्निधौ । रक्षितः पठितं शास्त्रं स्वगुरोः पाद पद्मयोः ॥ इति पंडितसम्राट् स्वामी श्रीवैष्णवाचार्याः । 'रामानन्दं राघवानन्दशिष्यं साक्षाद्रामं धर्मसंस्थापकं च । सीतारामेवायुपुत्रेऽनुरक्तं योगीन्द्रं तं भाष्यकारं भजामः ।' इति पं० वैद्यनाथ मिश्राः । इत्यादिरूपेण आनन्दभाष्यकाराणां श्रीराघवानन्दाचार्यशिष्यत्वं स्वीकुर्वन्ति । स्वयमाचार्यचरणाः 'यदङ्घ्रिपंकेरुह संश्रयादहं समस्त वेदान्त विमर्श चातुरीम् । समाप्नवं तं जगदार्तिनाशकं यतीश्वरं राघवमाश्रये निशम् ॥' 'सूत्रवृत्तिकृतौ नत्वा व्यास बोधायनौ मुनी । श्रीमन्तं राघवानन्दाचार्यं गुरुं नमाम्यहम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



श्रीमद्रामसमारम्भां शुकबोधायनान्विताम् । राघवानन्दगुर्वन्तां वन्दे गुरुपरम्पराम् ।। इति च लिखन्ति । ततश्च ते जगद्गुरु श्रीराघवानन्दाचार्यशिष्या आसन्निति निर्विवाद मेव । ते च 'अयोध्याभिजनेन श्रीराघवानन्ददण्डिना । कृतं मार्तण्डभाष्यं स्यात् वेदमर्मविबुद्धये ।' इति स्वघोषितश्लोकेन आयोध्यका आसन्निति निश्चितमेव । 'योध्या न केनचिद्या हि सायोध्या भुक्तिमुक्तिदा । श्रीरामजन्मभूमिं सा सुरेन्द्रादिसुरैः स्तुताः ।। तस्यां हि चातिपुण्यात्मा श्री वशिष्टसरस्तटे । सरयूपारजोविप्रो निष्णातोधर्मकर्मयोः । दीनबन्धुर्दयासिन्धुर्निरतो कर्मधर्मयोः । अवधेशप्रसादाख्य त्रिपाठी वेदशास्त्रवित् । वसतिस्म महाचार्यो हर्यानन्दैर्हि दिक्षितः । तत्पत्नी चाम्बिकादेवी विदुषी भक्तिशालिनी । उचुश्च तं महासिद्धो हर्यानन्दोद्विजोत्तमम् । भवनेतेऽवतीर्णश्च श्रीवशिष्ठो भविष्यति ।। चैत्रस्य शुक्लपक्षस्यैकादश्यां हि तिथावथ । अवधेशप्रसादस्य पुत्ररत्नमजायत ।। उपवीतविधिं कृत्वा श्रीवैष्णवमठे पिता । स्वस्य दीक्षा गुरुणां श्रीहर्यानन्दार्यसन्निधौ ।। श्रीराघवप्रसादाख्यः स्वात्मजपठनाय च । ररक्ष स्वल्पकालेन वेदशास्त्राण्यधीतवान् ।। छात्रकाले च तेनाथ वहवो वादिनोजिताः । अतिवैराग्यशीलोऽसौ परिणयं चकार न । वैशाख शुक्लपक्षस्य शुभायां नवमीतिथौ । श्रीहर्यानन्दः देवैः श्रीराममन्त्रेण दीक्षितः ।। (आचार्य विजय ध्वजः १ तः १०) अयोध्याजनितोयेन पावितं सर्वमानवम् । तस्याचार्य वरिष्ठस्य सम्भूयान्मङ्गलं भुविः ।।' (आचार्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF


मङ्गलध्वजः २१८) इत्यादिप्रबन्धतोऽपि पूर्वोक्तस्य पुष्टिर्जायते ।

शिष्टप्रमाणविरहितस्तथाकथितवादप्रचालिततोदाक्षिणात्यास्ते आसनित्याग्रहश्चेत्तेषामभिजनग्रामः कः ! पितरौ च कौ ? कदा कैराचार्यैः कस्मिन्मठे पीठे वा दिक्षिताः ? पूर्वाश्रमनाम किमासीत ? इमे च ज्येष्ठपुत्राः कनिष्ठपुत्राः मध्यमा वा आसन् ! ज्येष्ठा कनिष्ठा वा भगिन्यौ चास्तां न वा ! पञ्चगौद पञ्चद्राविदेषु विभक्तेषु ब्राह्मणेषु कुत्र गणना आसीत्तेषाम् ! इतरे वासन् ! कः वेदः ? का शाखा ! कः पादः ! का शिखा ! धर्मगृहसूत्रे च के ? कौलीन पारम्परिकपौरोहित्यकर्मकारश्च कः आसीत ? अवतारतिथिः का ? कालश्च कः ! तेषां पूर्वजागुरवश्च औत्तरीयाः पौरस्त्याः पाश्चात्याः दाक्षिणात्याः वा के आसन् ! इत्यादिकं बहुवक्तव्यमवशिष्यते । तदत्रापि 'भगवान् श्रीराघवानन्दाचार्य' इत्याख्य रामायणी श्रीअवधेशदासानां निबन्धोऽनुसन्धेयः । किञ्चात्राऽपि दत्ताऽवधानेन देया दृष्टिः 'पाद्योभावादूगतायां कलियुगशरदि अद्भुरायेशकाब्दे, वर्षे साधारणाख्ये समधिगततुले वासरे तीरसंख्ये । वारे जीवे चतुर्थ्यां समजनि च तिथौ शुक्लपक्षे सुकर्मा आजन्मूलाख्यतारेयतिपतिरपरो रम्य जामात्रिनामा' ।। श्रीगीतार्थ संग्रह दीपिकाया भूमिकाया प्रथमपृष्ठे श्रीकांची प्रतिपादिभयङ्कराचार्याः श्रीवरवरमुनि विषयकश्लोकं लिखन्ति तदनुसारेण ४४७१ गतकलिकालो गण्यते 'ईशवीय चतुर्दशशतकस्योत्तरार्धेलब्धजन्मा वरवर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



मुनिः' श्रीसम्प्रदायस्येतिहासस्य चतुर्दशपृष्ठे भूतपूर्व वाराणसेयसंस्कृतविश्वविद्यालयीय श्रीरामानुज वेदान्ताध्यापकाः स्व० को० व० नीलमेधाचार्याः लिखन्ति एतेनाऽपि प्रदर्शित पूर्वमतं पुष्टं भवति। श्रीआनन्दभाष्यकाराणामवतार कालः 'खं नमो वेद वेद प्रमिते वर्षे गते कलौ'(अगस्त्य संहिता१३२·७) इत्यतः ४४०० कलिकाल निश्चप्रचं ततश्च श्रीआचार्य चरणतः एकसप्ततिवर्षपश्चाद्भाविनां श्रीवरवरमुनीनां आनन्दभाष्यकारतः त्रयोदशश्रेणिपूर्ववर्तिनां महर्षि श्रीपुरुषोत्तमाचार्यबोधायनानां श्रीसम्प्रदायस्य नवमाचार्याणां गुरुरूपेणोट्टङ्कनं विधाय धूलिप्रक्षेप विधिना जनान् वञ्चयन्ति स्वार्थग्रहग्रहिला जनाः श्रीरामानुजीयाः वान्धवाः। अतोऽयं विषयपक्षपातगन्धरहितविदुषां मीमांसा अपेक्षते। दत्ताऽवधानेन दातव्या दृष्टिः। यद् वाग्जालजालेनावद्धसन् 'कः गुरुः' इति पक्षोत्थापितः।

किञ्चापरोऽपि विषयः समाकर्षति निष्पक्षपातिविद्वत्समूहं निर्णयाय। तद्यथा 'मान्त्रन्तराणां संसारवर्धकानामत एव क्षुद्रत्वप्रतिपत्तियोग्यानामितरभगवन्मन्त्राणामुपदेष्टुराचार्यत्वपूर्तिर्नास्ति' (स्वामी लोकाचार्यकृत श्रीवचन भूषणम्) 'पुत्रकामानां राममन्त्रादयः विजयकामाना सुदर्शन नारसिंह मन्त्रादयः इतीश्वरेण नियमेनाकल्पितत्वात् प्रायेणक्षुद्रफलप्रदा एवेत्यवगन्तव्यम् (स्वामी लोकाचार्यकृत श्रीवचन भूषणम्) इत्यादिरूपेण ब्रह्मतारकश्रीराममहामन्त्रस्य निन्दा कर्तृभिः सह 'श्रीरामस्य मनुंकाश्यां जजाप वृषभध्वजः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF


मन्वन्तरसहस्रैस्तु जपहोमार्चनादिभिः ।। ततः प्रसन्नोभगवान् श्रीरामः प्राह शंकरम् । वृणीस्व यदभीष्टंतद्दास्यामि परमेश्वर । मणिकर्णिकायां मत्क्षेत्रे गङ्गायां वा तटे पुनः । मृयते देहि तज्जन्तोर्मुक्तिं नाऽतो वरानन्तरम् । क्षेत्रेऽस्मिन् तव देवेश यत्र कुत्रापि वा मृताः । कृमिकीटादयोप्याशु मुक्ताः सन्तु न चान्यथा । अविमुक्ते तव क्षेत्रे सर्वेषां मुक्तिसिद्धये । अहं सन्निहितस्तत्र पाषाणप्रतिपादिषु ।। क्षेत्रेऽस्मिन् योर्चयेत् भक्त्या मन्त्रेणानेन मां शिव ! । ब्रह्महत्यादिपापेभ्यो मोक्षयिष्यामि मा शुचः । त्वत्तो वा ब्रह्मणोवाऽपि ये लभन्ते षडक्षरम् । जीवन्तो मन्त्रसिद्धास्युरन्ते मां प्राप्नुवन्ति ते । मुमुर्षो दक्षिणे कर्णे यस्यकस्याऽपि वा स्वयम् । उपदेक्ष्यसिमन्मन्त्रं स मुक्तो भविता शिव !, इत्यादि रूपेण अथर्ववेदगीत महिम्नः श्रीसम्प्रदायस्य श्रुतिस्मृतिसम्पादितदिशा परम्परा निर्वहमानानामाचार्य चरणानां श्रीरामानुजीय परम्परा सम्बन्धत्वं कथङ्कारं सम्भवति । इमे आचार्यचरणाः सर्वेश्वरश्रीरामसूचित ब्रह्मणः परम्परा संबद्धा इति तु पूर्वमेव सूचितम् । किञ्चान्यत् 'नह्येते मन्त्रा अस्मत् कुलपरंपरा प्राप्त मन्त्रत्रयव्यतिरिक्ता लक्ष्मीनाथमारभ्यास्मदाचार्यपर्यन्तं केनचिदाचार्येण कस्यचिद् शिष्यस्योपदिष्टा' इति दुर्जन करिपञ्चाननस्थ स्वामी रङ्गाचार्य महाभाग वचनेनापि अवगम्यते यद् श्रीरामानुजीय परंपरायां श्रीराममन्त्राणां शिराममन्त्रेण परंपरा नास्ति तदा कथम् इमे महाचार्याः श्रीक्षा दीक्षादिदीक्षिताः ? किञ्चात्रगमरूम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



किञ्च 'सुशीलशमदक्ष शान्तो दान्तः श्रीमान् जगद्गुरुः । पुनः सत्सम्प्रदायस्य वर्तयिता मुनीश्वरः ॥ कृपया यस्य लोकेस्मिन् जनाः सर्वे निरामयाः । श्रीरामभक्ति निरता सदाधर्मपरायणाः । श्रीमानाचार्यवर्योऽयं रामानन्दो महामतिः । शिष्योपशिष्यैरन्यैश्च शोभितोऽहर्दिवम्भुवि । पूज्यो ध्येयश्च जगतां रामरूपो जगद्गुरुः । हेतु कल्याण मार्गस्य शुभदो ज्ञानदोनिशम् ॥' (श्रीअगस्त्य संहिता १३२ २४–२५–५३–५४) 'आसमद्रं चतुर्दिक्षु विचरन् धर्मतत्परः कर्ता वै वहुधा लोकं रामाभिरतमुत्तमम् । लेष्यन्ति नास्तिका स्तस्य प्रतापहततेजसः । तमोपहे यथा सूर्येऽभ्युदिते तारका गणाः ॥' (श्री अगस्त्य संहिता (१३४।५–६) इत्यादिरूपेण प्रथितयशशामितरपरंपराया सम्बन्धत्वमाकलयितुं कथं शक्यते । आगमोऽयमेषामेवाचार्यप्रवराणां जगद्गुरुत्वं वैदेशिककदाचाराक्लिष्टभारतीय सद्धर्मोद्धारकर्तृत्वम् हीनजनोद्धारकर्तृत्वञ्च मुक्तकण्ठेन वक्तिः । एतेन प्रकृताऽगस्त्य संहितायाः १३२ अध्याय २४-५४ श्लोकस्थः 'जगद्गुरुः' 'जगद्गुरुः' इत्यादिरूपेणैकाधिकवारजगद्गुरुशब्दप्रयोगेणाऽऽनन्दभाष्यकारश्रीचरणानामेव 'जगद्गुरुः' इत्युपाधिभाक्त्वं सुस्पष्टमभिहितमागमशास्त्रेणातः पण्डितमानिनामागमशास्त्ररहस्यविधूगणां श्रीशङ्कराचार्याणामेव जगद्गुरुरुपाधिरासीदिति मतं व्याहतं वेदितव्यं तेषां शास्त्रीयतत्त्वज्ञानाभासमात्रत्वात् । जगदाचार्यावतरणकालीय सामाजिक राजनैतिकस्थितितः को नाम ऐतिहासिकः अविदितो भवेत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



अत एवानेकै रैतिहासिकैर्वस्तुतो जगद्गुरुत्वपदभाक्तमेषामेवाचार्यप्रवराणामिति वहुशोनिरूपितं यत्र तत्र सर्व जनसंग्रहकरणशीलत्वात् । येषां सर्वतोभाविक सततप्रयत्नेन भारतभूरियं भारतत्वेन अद्य प्रति भाति नो चेदस्याकृतिरन्यथैवावलोक्येत । यथा गान्धार प्रभृतिकस्थानस्येति के नाम न जानन्ति । किञ्चैतेषामाचार्यप्रवराणाम् स्वतन्त्राचार्यत्वक्षमतायामप्याशङ्का येन सत्साहित्यस्वरूपमन्यथैव प्रदर्श्य विकृतित्वरूपेण जन संसदि प्रदर्श्यते । अतोऽत्रस्वस्थधियासंविचारणीयं मनीषिभिः ।

सर्वेश्वर श्रीसीतारामाभ्यां नमः
श्रीहनुमते नमः

प्रस्थानत्रयानन्दभाष्यकाराय नमोनमः
जगद्विजायि महामहोपाध्याय

卐 जगद्गुरु श्रीरामानन्दाचार्य श्रीरघुवराचार्य 卐
प्रणीता

# आचार्यस्मृतिः

सीताभिन्नं राघवेन्द्रं नत्वा वैष्णवतुष्टये ।
गुप्तये चास्य धर्मस्य तनोम्याचार्यसंस्मृतिम् ॥१॥

साष्टाङ्गं प्रणीपत्याथ हनुमन्तं गुरुं धिया ।
सदाचारसुरक्षायै यत्नोऽयं क्रियते मया ॥२॥

अनारतं जानकिजानिचिन्तकं महाबलं श्रीपवमानसम्भवम् ।
विदेहजाप्राप्तमगाधसन्मतिं नमामि भक्त्या धिषणा विशुद्धये ।३।

लोकाधिनाथदययाखिललोकसृष्टिं कर्तुं समाकुलमतिः चतुराननो यः ।
सम्यक् प्रणम्य हनुमन्तमवाप्य मन्त्रं
सृष्टिं चकार विधिना तमहं प्रणौमि ॥४॥

हिरण्यगर्भात् समवाप्य दीक्षां–यः सूर्यवंशस्य गुरुर्वभूव ।
चकार ग्रन्थान् जगतो हिताय तस्मै वशिष्ठाय नमामि मूर्ध्ना ।५।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



लोकेशप्रेष्ठतनयादुपलब्धबोधो होराविज्ज्यौतिषनये कुशलो वरिष्ठः ।
श्रीरामचन्द्रचरणाम्बुजषट्पदोऽसौश्रीमान् पराशरमुनिः परिपातु नित्यम् ६
यो वै पराशरमुनेरुपलब्धदीक्षः श्रीराममन्त्रकृपया कृतवान् पुराणान् ।
वेदान् विभज्य च मुनिश्रुतिसारभूतं
शारीरकं व्यरचयत् स नतं पुनातु ॥७॥
स.केतलोकादवतीर्यकीरो गर्भेऽवसत षोडशहायनान्तम् ।
वैराग्यरागः श्रुतिपारदृश्वा, वैयासकिः पातु तपोनिधिर्माम् ॥८॥
यो बोधायननामलोकविदितः श्रीशङ्करस्यात्मजः
विख्याता मिथिलामहीजननभूर्विद्यावतामग्रणिः ।
आचार्याच्छुकदेवतो गुणनिधेः श्रीवैष्णवीं संस्कृतिं
लब्ध्वा यो पुरुषोत्तमत्वमगमत तं सर्वदा नौम्यहम् ।९।
बोधायनाद् वैष्णधर्मदीक्षामवाप संस्कारपुरस्सरां यः ।
तं रामनारायणविप्रपुत्रं गङ्गाधरार्यं गुरुमानतोस्मि ॥१०॥
गङ्गाधरस्य प्रियशिष्यवरं यतीन्द्रं, मराल्लिकासुनु तथागतास्मि ।
विद्यातपः शील्पुनीतदेहं, श्रीमत्सदानन्दगुरुं नमामि ॥११॥
यतेः सदानन्दगुरोः सुशिष्यं श्रीकल्पनाथात्मजपद्मजाजम् ।
शास्त्रार्थसाम्नोः कुशलं गुणज्ञं रामेश्वराचार्यवरं प्रणौमि ॥१२॥
आभूतो जगति कृतिनामग्रणीर्योप्रभासे,
द्वारानन्दो बुधजननुतो गोमतीदेविगर्भात् ।
दीक्षां दिव्यां परिणतमतिः प्राप रामेश्वरार्यात्
तस्मै मे श्रीनयबुधवरायास्तु नित्यं प्रणामः ॥१३॥
तातः श्रीमनमोहनो बुधवरो माता च श्रीभारती
तीर्थे देवप्रयागकृच्छ्तपसा यं रामभक्त्याऽलभत् ।
देवानन्दस्वरूपगीष्पतिरसौ श्रीवैष्णवः पण्डितः
द्वारानन्द सुशिष्यवादि भयकृत मां पातुभक्त्यानतम् ।१४।
पुण्याभूमिर्विबुधनगरी या पुरीति प्रसिद्धा
तस्यां दुर्गाचरणतनयः श्यामनाम्ना बभूव ।
देवानन्दाद् रघुवरमनुं दीक्षया प्राप्य जातं
श्यामानन्दं गुरुवरमहं नौमि स्वाभीष्टसिद्धयै ॥१५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



मैथिलः श्रीश्रुतानन्दाचार्यो विश्रुतवैष्णवः ।
कमलाकुक्षिसम्भूतः सीताकान्तसुतोऽवतु ॥१६॥

श्रीसोमभद्रतनयो भुवि चित्रकूटे जातं श्रुतानन्दगुरो सुशिष्यम् ।
साधोर्मुखाज्जातकथा विरक्तं गुरुं चिदानन्दमहं नमामि ॥१७॥

श्रीगोविन्दसुतो विचक्षणकुले गर्भान्निर्लिन्याद्विजः
सञ्जातः श्रुतिशास्त्ररक्षणचणो योऽवन्तिकायां पुरा ।
लब्ध्वा राममनुं सुधांशुप्रतिभं श्रीमच्चिदानन्दतः
पूर्णानन्दगुरुं नमामि संततं तं वैष्णवेन्द्रं बुधम् ॥१८॥

जनकनगरजातं वैष्णवं प्राप्तदीक्षं
द्विजपशुपतिपुत्रं पूर्णशिष्यं सुधीन्द्रम् ।
गुणभरनररत्नं वादिनां भीतिकारं,
सकलभुवनवन्द्यं श्री श्रियानन्दमीडे ॥१९॥

जातो हरिः कर्णपुरे वरेण श्रीमाच्छ्रियानन्द यतीश्वरस्य ।
दीक्षां ततः प्राप्य सवैष्णवीयामानन्दयुक्ताय नमामि तस्मै ॥२०॥

श्रीराघवानन्दयतीन्द्रमुख्यमायोध्यकं पण्डितराजपुत्रम् ।
अम्बावधेशाज्जनितं सुधीन्द्रं हरेः सुशिष्यं प्रणमामि मूर्ध्ना ॥२१॥

श्रीमत् पूण्यसुशीलयोः प्रियसुतं जातं प्रयागे क्षितौ
प्रस्थानत्रयभाष्यरत्नरचनाप्राप्तप्रतिष्ठं मुनिम् ।
संसारानलतापतप्तमनसामानन्दभाष्याम्बुभिः
रामानन्दयतीन्द्रदिव्यचरणौ वन्दे सदानन्ददम् ॥२२॥

रामानन्दः परमनिपुणं मैथिलं विप्ररत्नं
दीक्षा शिक्षा प्रखरप्रतिभं वैष्णवं यं चकार ।
आचार्यः सो द्विजरघुसुतः शैवदर्पापहर्ता
भावानन्दः प्रणतसुखदः पातु नित्यं प्रपन्नम् ॥२३॥

श्रीदेवीकुक्षिसम्भूतं विप्रं यज्ञनिधेः सुतम् ।
गुरुमनुभवानन्दं भावानन्दाश्रितं नुमः ॥२४॥

अनुभवमुनिशिष्यं कृष्णलीलानुरक्तं यवनजनविरोधे कौशलं धारयन्तम् ।
व्रजजनपदवासं पञ्चसंस्कारतृप्तं
विरजमुनिपदाब्जं नौमि सर्वार्थसिद्ध्यै ॥२५॥

विरजानन्दसच्छिष्यं वेङ्कटाचलवासिनम् ।
रामहिम्मतसत्पुत्रमाशारामं नमाम्यहम् ॥२६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



श्रीरामभद्रार्यसुगौरणवाय, यज्ञात्मजायाखिलशास्त्रवेत्त्रे ।
आशार्यदीक्षाप्तमनुप्रभावादाचार्यवर्याय नमोऽस्तु भूयः ॥२७॥
नमामि भूयो रघुनाथमार्यं यो रामभद्राप्तमनुत्तमं मनुम् ।
सीतापतिं केशवनाथसूनुः भक्त्याजपन्मङ्गलनामधेयम् ॥२८॥
विश्वम्भराय रघुनाथसुशासिताय श्रीरामचन्द्रचरणाम्बुज षट्पदाय ।
श्रीसत्यभामातनयाय भूयो नतिर्मदीया सततं विभातु ॥२९॥
श्रीराघवेन्द्रार्यमहं नतोऽस्मि यो जन्मनालंकृतवान् विदेहम् ।
सुरेन्द्रलक्ष्मीतनयः सुदीक्षां विश्वम्भरार्यादलभत स जीयात् ॥३०॥
वैदेहीवल्लभयतिं प्रणमामि मूर्ध्ना लेभेजनिं हिमागिरौ किल पोखरायाम् ।
काश्यां पुराणनिचयं गुरुणाधिगम्यश्रीराघवेन्द्रयतिना परिदीक्षितो यः ३१
श्रीरामपुत्रः शतकादिकर्ता यो दीक्षितोवल्लभगौष्णवार्यात् ।
श्रीकोशलेन्द्रार्यं जगद्गुरुं तं विरक्तभाजं प्रणमामि भक्त्या ॥३२॥

श्रीमद् रामकिशोरार्यं कोशलेन्द्रार्यदीक्षितम् ।
भुवनेश्वरसञ्जातं नमामि बुधवन्दितम् ॥३३॥

श्रीजानकीनिवासार्यं वैष्णवाचार्यधीमते
किशोराचार्यतोदीक्षा प्राप तस्मै धिया नमः ॥३४॥

श्रीसाकेतनिवासार्यो मण्डीजातोऽथदीक्षितः ।
श्रीमद् रामकिशोरेण तं नमामि हरिप्रियम् ॥३५॥

श्रीजानकीजीवनदेशिकाय साकेतशिष्याय बुधेश्वराय ।
आनन्दभाष्याब्धिप्रवाचकाय नमोऽस्तु सीतास्तव कारकाय ॥३६॥
तस्मै नमोऽस्तु भरताग्रजदेशिकाय श्रीराघवेन्द्रचरणाम्बुजसंश्रिताय ।
श्रीजानकीचरणवन्दनदीक्षिताय श्रीरामभक्तप्रवरायविदर्भजाय ।३७।
भरतदेशिकशिष्यबुधं गुरुं हनुमदार्यं रमापतिकिङ्करम् ।
प्रणवमङ्गलरामगुणाम्बुधौ विनिहितात्ममतिं प्रणमाम्यहम् ॥३८॥

श्रीसम्प्रदायाचार्याणामाचार्यस्मृतिनामके ।
ग्रन्थे नतिः शुभायास्तु पूर्णतामातनोतु च ॥३९॥

इति शतावधानी जगद्विजयी महामहोपाध्याय
## जगद्गुरु श्रीरामानन्दाचार्य श्रीरघुवराचार्यजी
वेदान्तकेसरी प्रणीताचार्यस्मृतौ पूर्वाचार्यनमस्कारात्मकः प्रथमपरिच्छेदः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रीसीतारामाभ्यां नमः

जगद्गुरु श्रीरामानन्दाचार्याय नमः

# सद्गुरु

## का

# कोई विकल्प नहीं

लेखक

श्रीवैष्णव हरिराम लश्करी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आनन्दभाष्यसिंहासनासीन

## जगद्गुरु श्रीरामानन्दाचार्य श्रीरामेश्वरानन्दाचार्यजी

जगद्गुरु श्रीरामानन्दाचार्य पीठ

अहमदाबाद—३८०००७

का

# आशीर्वाद

जगद्गुरु श्रीरामेश्वरानन्दाचार्यजी

श्रीवैष्णवहरिरामलश्करी एक सुलझे हुये विचारक समाज सेवक एवं साहित्यकार हैं। उनके श्रीमद्रामायण सम्बन्धी कई एक निबन्ध प्रकाशित हो चुके हैं। सम्प्रति वे वानप्रस्थी जीवन व्यतित करते हुये समाज एवं साहित्य सेवा में संलग्न हैं। "सद्गुरु का कोई विकल्प नहीं" श्रीलश्करीजी का अपने शास्त्रीय गहन चिन्तन की अभिव्यक्ति है जो सर्वशास्त्र सम्मत है। विशेषकर श्रीरामानन्द सम्प्रदाय के तथ्यों को उजागरित करता है। सायुज्य मुक्ति की अभिलाषा वाले मानवों के लिए परमोपयोगी है। अतः साधक जनों को इससे पर्याप्त लाभ उठाना चाहिए। लेखक इसी प्रकार से सत्साहित्य सेवा में समर्पित रहते हुये श्रीरामानन्द दर्शन साहित्यों को उजागरित करते रहें। प्रकृत प्रबन्ध लेखक के मल उद्देश्य श्रीरामशरणापत्ती को जीव प्राप्त करें। इस तथ्य को उजागरित करते हुये अधिक से अधिक प्रचार प्रसार प्राप्त करे। यही सर्वेश्वर श्रीसीतारामजी से मंगल कामनायें है।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

# ॐ सादर समर्पण ॐ

मेरे सद्‌गुरु

अनन्त श्रीविभूषित परम पूज्य आनन्दभाष्यसिंहासनासीन

**जगद्‌गुरुश्रीरामानन्दाचार्यश्रीरामेश्वरानन्दाचार्य**

जगद्‌गुरु श्रीरामानन्दाचार्यपीठ श्रीकोसलेन्द्रमठ सरखेज रोड

पालडी अहमदाबाद–३८०००७

को

# ॐ सादर समर्पित ॐ

चरण सेवक हरिराम लश्करी

# ॐ प्राक्कथन ॐ

परमपूज्य श्रीसद्‌गुरु का उपदेशामृत मेरे कर्णरन्ध्रो में प्रवेश हुआ, इसकी अनुभूति मुझे हुई, चेतना जाग्रत हुई और जन-कल्याण की भावना से प्रेरित होकर, अज्ञान अन्धकार में भटकने वालों के, सद्‌गुरु की शरण ग्रहण करने की प्रेरणा देने के लक्ष्य से, इस पुस्तक की रचना करने की स्फुरणा मुझे हुई और फल-स्वरूप जैसा भी बना वैसा मैंने लिखा। यद्यपि मुझ अज्ञानीका यह दुस्साहस अनधिकृत चेष्टा ही है तथापि अंधों को काना व्यक्ति भी राजमार्ग पर अग्रसर कर ही सकता हैं इस बिचार से गुरु विहीन सज्जनों को गुरु चरणों की शरण ग्रहण करने का सत्परामर्श देने का मैंने प्रयास किया है। अगर किसी सज्जन ने इस पुस्तक को पढकर मेरा उद्देश्य सफल किया तो मैं उनका बडा आभारी रहूंगा। विद्वद्‌वृंद तो मुझे मेरी इस अनधिकृत चेष्टा के लिए क्षमा करें।

विनीत हरिराम लश्करी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

# ❦ लेखक का अल्प परिचय ❦

खं वसु ग्रह चन्द्र विक्रमी भाद्र कृष्णैकादशी ।
कर्क लग्ने रात्रिकाले स्वगृहे रवि बुध शशी ॥
मंद कन्या जीव तुला सिंहस्थ भृगु भौम राहु ।
रामदास सुनु हरिराम श्रीवैष्णव कुल प्रकट आहु ॥१॥

परम भागवत पिताश्री थे वैष्णवाचार पालनकारी ।
गीता पाठ अरु तुलसीकंठी ऊर्ध्वपुण्ड्र तिलकधारी ॥
कथा भागवत गीता पढती माता सुन्दरबाई नाम ।
राजस्थाने पाली नगरी घर में ठाकुर पूजा काम ॥२॥

प्रशासकीय सेवारत रहते रामभक्ति उर अधिकाई ।
जयसियाराम ही सबसे कहते पलट यही पदवी पाई ॥
अष्टोत्तरशत चौपाई की रामायण संक्षिप्त किये ।
तुलसी महिमा, धर्म चर्चा, रामायण विस्तार किये ॥३॥

तारक राममन्त्र मनभाया गुरु बिन मनमुख जाप किये ।
दृढ विश्वास लगनके कारण प्रभुने सद्गुरु मिला दिये ॥
ग्रहबाण खं नेत्र ज्येष्ठ सित तृतीया रवि कल्याण किये ।
(श्री)रामेश्वरानन्दाचार्य गुरुजी पञ्चसंस्कार सम्पन्न किये ।४।

शब्दार्थः-खं=आकाश=शून्य, वसु=आठ, ग्रह=नौ
चन्द्र एक, मंद शनि, जीव गुरु

अर्थात् इकाई के स्थान पर शून्य, दहाई के स्थान पर आठ, सैकडा के स्थान पर नौ और हजार के स्थान पर एक रखने से जो संख्या बनी वह विक्रम संवत् १९८० भाद्रपद कृष्ण एकादशी (प्रथम) रात्रिकाल में पुनर्वसु नक्षत्र का चतुर्थ चरण होने से कर्क लग्न वर्तमान था जिसमें स्वगृही कर्क राशि लग्न में चन्द्रमा, सूर्य स्वगृही सिंह राशि द्वितीय भाव में बुध स्वगृही उच्च राशि का तृतीय भाव में साथ में शनि, गुरु तुला

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



राशि का चतुर्थ भाव में और सिंह राशि द्वितीय भाव में सूर्य के साथ शुक्र मंगल तथा राहु स्थित थे। राहु के सामने ही सातवें घर में हमेशा केतु रहता ही है इसलिये केतु कुण्डली के आठवें भवन में था। उपरोक्त योग में श्रीवैष्णव कुल में श्रीरामदासजी लश्कारी के पुत्र रूप में मुझ हरिराम लश्करी का जन्म हुआ।

(२) पिताजी श्रीरामदासजी परम भागवत वैष्णव आचार विचार से रहते हुए नित्य प्रति श्रीमद्रायाषण तथा गीतापाठ करते, ऊर्ध्वपुण्ड्र, शुक्ल श्री का लश्करी, तिलक तथा गले में तुलसी काष्ठ की कंठी धारण किये रहते थे। माताजी श्रीमती सुन्दरबाई हमेशा कथा श्रीमद्रायायण तथा गीता का पाठ करती थी, घर में श्रीठाकुरजी की पूजा करती थी, राजस्थान की पाली नगरी में, माता पिता के प्रत्यक्ष वैष्णवी आचार विचार की शिक्षा मैंने हृदयङ्गम की।

(३) डाक विभाग की विभिन्न प्रशासकीय (निरीक्षक, अधीक्षक, राजपत्रित डाकपाल आदि) सेवाओं में रहते हुए भी स्वपाकी, खानपान की शुद्धता और दैनिक भजन पूजन का भलीभाँति निर्वाह करते हुए श्रीराम भक्ति का रंग दिन प्रतिदिन प्रगाढ होता गया' सहकर्मियों से मेरा नमस्ते के स्थान पर जयसियाराम कहना इतना अधिक प्रचलित प्रचारित हुआ कि उन लोगों ने पलट कर मेरी पहचान ही जयसियाराम कर दी। सेवा निवृत्त होकर अर्थोपार्जन के लक्ष्य को तिलाञ्जलि देकर स्वाध्यायरत हुआ और फलस्वरूप १०८ चौपाई की 'संक्षिप्त रामायण' तुलसी महिमा, धर्म चर्चा तथा उसी "संक्षिप्त रामायण" की विस्तृत टीका और प्रस्तुत "सद्‌गुरु का कोई विकल्प नहीं' लिखकर अब तक का कालक्षेप किया' संक्षिप्त रामायण की प्रतियां प्रकाशित करके मैं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



जनता में निःशुल्क वितरण की जा रही हैं, तुलसी महिमा स्थानीय मासिक पत्र "रामानन्द ज्योति" को क्रमशः प्रकाशन हेतु दे दी है। धर्म चर्चा की पाण्डुलिपि मम आत्मज श्रीसाकेतवासी श्रीचन्द्रप्रकाश लश्करी की अहृदयं गम पत्नी के कब्जे में पडी पडी सड रही है तथा १०८ चौपाई की संक्षिप्त रामायण की विस्तृत टीका लगभग तैयार है जिसका शीघ्र ही प्रकाशन होने की आशा है।

(४) षडक्षर श्रीरामतारक मन्त्र के प्रति अत्यधिक लगाव होने के कारण उपयुक्त गुरु के अभाव में मनमुख जाप ही करता रहा 'दयामय प्रभु श्रीरामजी ने दया करके जगद्गुरु श्री रामानन्दाचार्य पीठासीन त्रिदण्डधारी अनन्त श्रीविभूषित आनन्द भाष्यसिंहासनासीन जगद्गुरु श्रीरामानन्दाचार्य श्रीरामेश्वरानन्दाचार्यजी श्रीकोशलेन्द्र मठ सरखेज रोड पालडी अहमदाबाद से मेरा सम्पर्क कराया जिसके फलस्वरूप ब्रह्म १, बाण ५, खं ०, नेत्र २, अर्थात् विक्रम संवत् २०५१ के ज्येष्ठ मास की शुक्लपक्ष की तृतीया तिथि रविवार को पुनर्वसु नक्षत्र के चतुर्थ चरण में कर्क लग्नस्थित चन्द्र (यही योग मेरे जन्म का भी है) लाभ अमृत के चौघडिये में मेरे सद्गुरुजी जगद्गुरु श्रीरामानन्दाचार्य श्रीरामेश्वरानन्दाचार्यजी ने कृपा कर के श्रीवैष्णव दीक्षा के पञ्च संस्कार सम्पन्न करके मुझे वाञ्छित मन्त्र प्रदान किया मुझ में नवजीवन सञ्चार हुआ और जीवन का परम चरम ध्येय प्राप्त हो जाने से मेरा कल्याण हो गया'

गुरु र्ब्रह्मा गुरुर्विष्णु र्गुरुर्देवो महेश्वरः ।
गुरुः साक्षात् परंब्रह्म तस्मै श्रीगुरवे नमः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

# भजन (१)

नुगुरा तूं ये सब क्या जाने ?

जैसे शरीर ने कपडे बदले, कभी नये और कभी पुराने ।
वैसे मैंने शरीर बदले, कोई माने या न माने ॥
मैं लगा उसे समझाने ॥ नुगुरा..."

सब में देखा एक ही फैशन, आहार निद्रा भय व मैथुन ।
पहचानो इस माया के गुन, सत्व रज और नीच तमोगुन ॥
भोग किये सब माने "नुगुरा..."

इस त्रिगुणमयी माया में फंसकर, तूं काटरहा चौरासी के चक्कर
हरि के भजन विना ए बन्दे, कटें नहीं माया के फन्दे ॥
लगे रहेंगे, आने जाने "नुगुरा...."

काम क्रोध और लोभ त्याग कर हो निर्द्वन्द्व निष्काम कर्म कर ।
सद्‌गुरु चरण शरण ग्रहण कर, गुरु मन्त्र से ब्रह्म लक्ष्य कर ॥
करले वेध, अचूक निशाने "सुगुरा..."

मानव जीवन का लक्ष्य यही है, वेद पुराण का तथ्य यही है ।
लश्करी हरिराम यूं भाषे इससे विपरीत सत्य नहीं है ॥
शेष रहा क्या समझाने–सुगुरा अब तूं क्या नहिं जाने

# भजन (२)

"गुरु बिनु सब अंधियारा"

गुरु बिनु अंधियारा रे साधो भाई गुरु बिनु सब अंधियारा ।
कैसे हो उजियारा हृदय में ज्ञानदीप नहिं जारा रे नुगुरा ज्ञान दीप नहिं....
तब तो गुरु बिनु सब अंधियारा ॥

भवसागर में नाव पडी है, बीच भंवर में नाव फंसी है
कोई नहीं खेवन हारा रे तब तो, डूब गये मंझ धारा रे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF


नुगुरा कैसे जावें पारा रे नुगुरा गुरु बिनु सब अंधियारा"
सुत बित दारा मेरा तेरा, मायाकृत बिस्तारा रे चेला म्हारा माया....
जिन्ह मेरा का संग्रह कीना, झूठ कपट व्यवहारा रे
नुगुरा झूठ कपट ....
क्यों के गुरु बिनु सब अंधियारा ॥
घरे रहे इसपार सभी जब, छोडचला संसारा रे नुगुरा छोड चला...
सबने किया किनारा कि गुरु बिनु कोई नहीं सहारा रे चेला मेरा
गुरु बिनु सब अंधियारा ॥
लखचौरासी हर योनी में, विषयबेल फलखाया रे नुगुरा विषयबेल....
सुख समझ कर भोग जो भोगे,
दुःख अन्त में पाया रे नुगुरा दुःख अंत
गुरु बिनु सब अंधियारा ॥
सच्चा सुख हाथ न आया रे
गुरु बिनु सत्य समझ नहीं पाया रे चेला म्हारा
कोटि जतन करि पचि पचि मर गये,
माया का पार नहीं पाया रे चेला म्हारा
गुरु बिनु सब अंधियारा"
माया के चक्कर में फंसकर, लख चौरासी भटकाया रे नुगुरा
कैसे छूट इस चक्कर से, गुरु बिनु समझ नहीं पाया रे चेला म्हारा
गुरु विनु सब अंधियारा"
लश्करी हरीराम यूं गावे, सद्गुरु शरण सहारा रे चेला म्हारा
सद्गुरु वचनसे भयो उजियारो, पायो सुख आधारा रे चेला म्हारा
सद्गुरु बचन उजियारा ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हरिः ॐ तत्सत्
श्री सद्गुरवे नमः

# सद्गुरु का कोई विकल्प नहीं

## मङ्गलाचरण

ॐ सहनाववतु । सह नौ भुनक्तु । सहवीर्यं करवावहै
तेजस्विनावधीतमस्तु । मा विद्विषावहै ।
ॐ शान्तिः ! शान्तिः !! शान्तिः !!!

सीतानाथ समारम्भां रामानन्दार्यमध्यमाम् ।
अस्मादाचार्यपर्यन्तां वन्दे गुरुपरम्पराम् ॥

अर्थः—वे सर्वेश्वर परमात्मा श्रीरामजी हम दोनों, आचार्य और शिष्य का साथ साथ रक्षण करें । हम सब विद्या सम्बधी तत्वज्ञान, शक्ति, सामर्थ्य साथ साथ प्राप्त करें । हम दोनों के अधीन पढी हुई विद्या तेजस्वी हो, अर्थात् सर्वकाम फलप्रद हो । हम परस्पर में द्वेष कभी भी न करें । दैहिक दैविक एवं भौतिक तीनों प्रकार के ताप की शान्ति हो ।

श्रीसीता पति श्रीरामजी से प्रारम्भ होकर जिस आचार्य परम्परा के मध्य में आनन्दभाष्यकार जगद्गुरु श्रीरामानन्दाचार्यजी हैं उस परम्परा के अन्त में मेरे गुरुजी जगद्गुरु श्रीरामानन्दाचार्य आनन्दभाष्य सिंहासनासीन स्वामीजी श्रीरामेश्वरानन्दाचार्यजी तक समस्त आचार्यों की मैं वन्दना करता हूं ।

जिन भौतिक वस्तुओं और भोग सामग्रियों की प्राप्ति हेतु आज का मानव अपने समस्त जीवन को झोंक रहा है और फिर भी उन्हें प्राप्त करने में असफल हो रहा है वह सब कुछ हमारे पूर्वजों को प्रचुर मात्रा में उपलब्ध होते हुए भी उन्होंने उनका तिरस्कार ही किया और आत्मचिन्तन व तपस्या करके आत्म कल्याण का मार्ग ढूंढा । उन्होंने चिन्तन किया कि यह समस्त दृश्य प्रपञ्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



क्या है ? पैदा होने और विनष्ट होने वाले समस्त चराचर प्राणि समुदाय की चौरासी लाख प्रकार की योनियों को उद्भिज, स्वेदज अण्डज और जरायुज, इन चार श्रेणियों में विभाजित किया और पाया कि:-

(१) समस्त उद्भिज सृष्टि केवल अन्नमय कोशयुक्त है जो पृथ्वी फोडकर, अन्न के रससे उत्पन्न होकर, अन्न से ही वृद्धि को प्राप्त हो कर अनुरूप पृथ्वी में ही लीन हो जाते हैं। ये पेड पौंधे लता गुल्म अचल श्रेणी के हैं।

(२) स्वेदज जो पसीने से उत्पन्न होते हैं जैसे जूं खट-मल इत्यादि' ये अन्नमय कोश के साथ प्राणमय कोश से भी युक्त होते हैं। अपना जन्म स्थान छोडकर अन्यत्र गमन कर सकते हैं। पाँच कर्मेन्द्रियों सहित पाँच प्राण (प्राण अपान व्यान, उदान, समान) को प्राणमय कोश कहते हैं।

(३) अण्डज जो अण्डे से उत्पन्न होते हैं, जैसे पक्षी। ये पाँच कर्मेन्द्रियों सहित मन अर्थात् मनोमय कोश से युक्त होते हैं। अन्नमय और प्राणमय कोश तो होते ही है।

(४) जरायुज जो जेर के साथ गर्भ से उत्पन्न होते हैं जैसे मनुष्य, गाय इत्यादि पशु। इनमें अन्नमय कोश, प्राणमय कोश, मनोमय कोश के अतिरिक्त विज्ञानमय कोश होता है। पाँच ज्ञानेन्द्रिय युक्त बुद्धि को विज्ञानमय कोश कहते हैं।

मनुष्य जरायुज विभाग में पशुओं के साथ होने के कारण हर प्रकार से पशु समान होते हुए भी एक विशेष कोश युक्त है जिसे आनन्दमय कोश कहते हैं जो अन्य सभी अन्नमय, प्राणमय, मनोमय, विज्ञानमय कोशों के अतिरिक्त है। यह मनुष्य की विशेषता है।

